# 2018

## M.A.

## Part–II Examination

## SANSKRIT

### PAPER—VI

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

*Illustrate the answers wherever necessary.*

First half – 50 Marks

1. किं नाम अनुमानलक्षणम् ? तत्र व्याप्तिज्ञानस्य कीदृशी उपयोगिता ? परामर्शज्ञानस्य स्वीकारे किं तात्पर्यम् ? 3+5+5

*अथवा*

निःश्रेयसाधिगमे नैयायिकैः काति पदार्थाः स्वीकृताः ? तत्राघस्य लक्षणं निरूप्य 'अनधिगतार्थगन्तृ प्रमाणम्' – इति लक्षणं युज्यते न वेति विचार्यताम्।

2. कस्यचिदेकस्य टीका लेख्या – 6

प्रमा, शब्दप्रमाणम्, आत्मा।

3. यथेच्छं प्रश्नत्रयं देवनागरलिप्या संस्कृतेन च पूर्णवाक्येन समाधेयम् – 2×3

(क) न्यायशास्त्रस्य कतिधा प्रवृत्तिः ?

(ख) कति सन्निकर्षाः ? के च ते ?

(ग) करणलक्षणं किम् ?

(घ) सोदाहरणं समवायिकारणलक्षणं लिख्यताम्।

(ङ) वाक्यलक्षणं तर्कभाषानुसारत उच्यताम्।

4. सांख्यशास्त्रजिज्ञासा कथं जायते ? कारिकोल्लेखपुरःसरं सविशदमालोच्यताम्। 13

अथवा

सांख्यसम्मतं पञ्चविंशतितत्त्वस्वरूपमालोच्याम्।

5. सप्रसङ्गं व्याख्यायताम् -- 6

'दृष्टवदानुश्रविकः स ह्यविशुद्धक्षयातिशययुक्तः'।

अथवा

'सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्'।

6 यथेच्छं प्रश्नत्रयं देवनागरलिप्या संस्कृतेन च पूर्णवाक्येन समाधेयम् – 2×3

(क) सांख्यमते आध्यात्मिकं दुःखं किम् ?





(ख) सांख्यमते कति प्रमाणानि ? कानि च तानि ?

(ग) व्यक्ताव्यक्तज्ञ - इत्यनेन केषां बोधः ?

(घ) सांख्यतत्त्वकौमुदी केन विरचिता ?

(ङ) सांख्यमते कति गुणाः ? के च ते ?

## Second Half – 50 Marks

1. अधोलिखितेषु द्वयोरुत्तरं देयम् – 10×2

(क) अनुबन्धचतुष्टयस्य नामान्युल्लिख्य अधिकारिविषययोर्विशदं विवरणं प्रदेयम्।

(ख) किं नाम महावाक्यम् ? चत्वारि महावाक्यानि कानि ? एकस्यार्थो निपुणं निरूपणीयः।

(ग) श्रवणमननिदिध्यासनानामुपयोगः कः ? तेषां स्वरूपं यथायथं व्याख्येयम्।

(घ) वेदान्तसारमनुसृत्य ब्रह्मस्वरूपं सम्यग् आलोच्यताम्।

2. अधोलिखितेषु एकस्य व्याख्या कार्या -- 5

(क) तुरीयं चैतन्यम्।

(ख) लिङ्गशरीरम्।

(ग) उपक्रमोपसंहारौ।

(घ) जहल्लक्षणा।

3. अधोलिखितेषु एकः प्रश्नः समाधेयः -- 12

(क) महाभाष्यानुसारं शब्दलक्षणं व्याख्येयम्।

(ख) व्याकरणस्य मुख्यप्रयोजनानि महाभाष्यानुसारंम् आलोच्यन्ताम्।

(ग) महाभाष्यमनुसृत्य व्याकरणशब्दस्यार्थो निरूपणीयः।

4. अधोलिखितेषु एकस्य : तात्पर्यं विशद्यताम् -- 7

(क) लघुत्वाच्छब्दोपदेशः।

(ख) चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति।

(ग) यथा लौकिकवैदिकेषु।

5. अधोलिखितेषु एकस्य व्याख्या कार्या -- 6

(क) यथेन्द्रशत्रुः स्वरतोऽपराधात्।

(ख) किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्त्यम्।

(ग) वृत्तिसमवायार्थ उपदेशः।

———